Ex/Sans/PG/1.1/15/2017

# MASTER OF ARTS EXAMINATION, 2017

(1st Year, 1st Semester)

## SANSKRIT

## Course : I

## [History of Sanskrit Literature and Ancient Indian Civilization]

Time : Two Hours Full Marks : 30

*The figures in the margin indicate full marks.*

१. अधोलिखितयोः प्रश्नयो**रन्यतरस्य** समाधानं कार्यम्। 6

(क) संस्कृतदृश्यकाव्ये श्रहर्षस्य कृतित्वं समासतो निरूपणीयम्।

(ख) खण्डकाव्यमित्यनेन किमुच्यते? कालिदासपरवर्त्तिषु खण्डकाव्येषु **त्रयम**वलम्ब्य निबन्धो रचनीयः।

२. अधःस्थितेषु प्रश्नेषु **द्वितयस्य** संस्कृतभाषया नागरीलिपिमाश्रित्य समाधानं कार्यम्। 1×2=2

(क) संस्कृतसाहित्ये एकस्य भावप्रतीकाश्रयि दृश्यकाव्यस्य (allegorical play) उदाहरणं दीयताम्। केन च तद्विरचितम्?

(ख) मुद्राराक्षसनाटके राक्षसः क आसीत्? तत्र कति अङ्का विद्यन्ते?

(ग) 'अवन्तिसुन्दरीकथा'काव्यानुसारं भारविः कस्मिन् गोत्रे अजायत? तस्य पूर्वपुरुषाणां निवासविषये तस्मिन् काव्ये किमुक्तम्?

[*Turn over*]

३. संस्कृतसाहित्ये महामहोपाध्याय-हरिदास-सिद्धान्तवागीशस्य कालीपदतर्काचार्यस्य वा कृतिमाश्रित्य संक्षिप्तो निबन्धो विरच्यताम्। 4

४. अधोनिर्दिष्टेषु प्रश्न**द्वयं** संस्कृतभाषया नागरीलिपिमाश्रित्य च समाधेयम्। 1×2=2

(क) श्रीरामकृष्णस्य चरितमाश्रित्य किं नाटकं केन च विरचितम्?

(ख) कस्तावद् कविः 'सनेट्'रचने कृतविद्य एव?

(ग) कस्तावद् नाट्यकारो 'वुडोदा' इति नाम्ना प्रसिद्धः? तद्विरचितस्य कस्यचिदेकस्य रूपकस्य परिचयो देयः।

५. मौर्यशासनव्यवस्थायाः स्वरूपमालोच्यताम्। 6

**अथवा,**

कुषाणयुगस्य स्थापत्य-शिल्पस्य विवरणं देयम्।

६. निम्नलिखितेषु प्रश्न**द्वयं** संस्कृतभाषया देवनागरीं लिपिमाश्रित्य च समाधेयम्। 1×2=2

(क) हरप्पासभ्यतायां प्राप्तानां समाधिस्थानानां द्वयोरुल्लेखः कार्यः।

(ख) उपधा कतिविधा? तेषां नामानि लिख्यन्ताम्।

(ग) हरप्पा-महेञ्जोदडो-नागरयोः प्रत्नतात्त्विकोत्खाननं कदा कृतम्?

७. किं नाम जातकम्? आख्यानसाहित्ये जातकस्य महत्त्वं समासतो निरुप्यताम्। 6

**अथवा,**

जैनागमेतरग्रन्थेषु व्याख्यामूलककाव्यानां विवरणं समासत उपस्थापनीयम्।

८. अधःप्रदत्तानां **द्वौ** प्रश्नौ संस्कृतेन नागरीलिप्या च समाधेयौ। 1×2=2

(क) तृतीयबौद्धसङ्गीतिः कस्य नृपस्य शासनकालेऽभवत्? तस्मिन् संमेलने कस्तावद् सभापति आसीत्?

(ख) अभिधम्मपिटकान्तर्गतानां ग्रन्थानां नामद्वयं लेखनीयम्।

(ग) 'षट्खण्डागमः' इति जैनग्रन्थः कया भाषया केन च विरचितम्।

---